# आदर्शप्रश्नपत्रम् – 2020-21
# कक्षा – द्वादशी (XII)
# संस्कृतम् (केन्द्रिकम्) कोड –322

**समयः – होरात्रयम्** **अङ्कयोजना** **सम्पूर्णाङ्काः – 80**

**अवधातव्यम् –**

1. अस्याम् अङ्कयोजनायाम् 'आ' भागस्य प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः दातुं शक्यन्ते तादृशानां प्रश्नानां मूल्याङ्कनं करणीयम्।
3. अनुच्छेदे श्लोके वा आधारिताः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः अनुच्छेदे प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि–शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च  अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

## अ - भागः

### बहुविकल्पात्मकाः प्रश्नाः 40 अङ्काः

### अनुप्रयुक्तव्याकरणम्

| | | |
|---|---|---|
| 1. | अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं सन्धिपदं सन्धिच्छेदपदं वा प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्)<br>(i) (क) शब्दो मे<br>(ii) (ख) प्रति + उत्तरम्<br>(iii) (क) खलु + अस्य<br>(iv) (ग) अन्यैर्नृपैः<br>(v) (क) उपगतः + तत्र<br>(vi) (ख) भोजन + अन्ते<br>(vii) (क) नैकेन | 1x6=6 |
| 2. | अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नपञ्चकम्)<br>(i) (क) शक्रेण समः<br>(ii) (ख) अश्वस्य पृष्ठात्<br>(iii) (क) क्रोधेन सहितम्<br>(iv) (ग) ललाटपुटे संस्थिता<br>(v) (क) यथेच्छम्<br>(vi) (ग) कामक्रोधलोभान्<br>(vii) (ख) सर्वविद्यानिष्णाता | 1x5=5 |
| 3. | अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्)<br>(i) (क) अभि+धा+क्त<br>(ii) (ग) निर्+ईक्ष्+शानच्<br>(iii) (क) सेवनीयानि<br>(iv) (ख) बल+मतुप्<br>(v) (क) संन्यासी | 1x6=6 |

| | | |
|---|---|---|
| | (vi) (ग) व्यवस्थिता<br>(vii) (क) पुत्रवत् + ङीप् | |
| 4. | समुचितम् उपपदविभक्तिरूपं चिनुत– (केवलं प्रश्नत्रयम्)<br>(i) (ख) स्वाध्यायात्<br>(ii) (क) पुत्राय<br>(iii) (ग) दिवङ्गते<br>(iv) (क) क्षणात् | 1x3=3 |
| | पठितावबोधनम् | |
| 5. | भाषिककार्यम् – निर्देशानुसारम् उत्तराणि चिनुत - (केवलं प्रश्नषट्कम्)<br>(i) (क) मदालसायै<br>(ii) (क) यौवने<br>(iii) (क) अहम् (कालिदासः)<br>(iv) (ख) कुलगुरवे<br>(v) (ग) भारत<br>(vi) (क) अशुचौ<br>(vii) (ग) गेयवेदः | 1x6=6 |
| 6. | अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चिनुत – (केवलं प्रश्नचतुष्टयम्)<br>(i) (क) वार्तालापः<br>(ii) (ख) नेत्रम्<br>(iii) (क) पालयामः<br>(iv) (ग) क्षणमात्रेण<br>(v) (ख) सहायतायाः | 1×4=4 |
| | संस्कृतसाहित्येतिहासः | |
| 7. | समुचितस्य रचनायाः कवेः वा अभिधानं चिनुत - (केवलं प्रश्नत्रयम् )<br>(i) (ख) अश्वघोषः<br>(ii) (ग) शिवराजविजयः<br>(iii) (क) मदालसा | 1×3=3 |

| | | |
|---|---|---|
| | (iv) (ख) बल्लालसेनः | |
| 8. | **गद्य-पद्य-नाटकस्य च विधानां समुचितं वैशिष्ट्यं चिनुत- (केवलं प्रश्नत्रयम्)**<br>(i) (ख) गद्यम्<br>(ii) (क) पद्यस्य<br>(iii) (ख) नाट्ये<br>(iv) (क) रूपकम् | 1x3=3 |
| 9. | **गद्य-पद्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) (ग) गद्यपद्यमयम्<br>(ii) (क) गेयता<br>(iii) (ख) चम्पूकाव्ये<br>(iv) (ग) छन्दोबद्धता<br>(v) (क) निकषम् | 1x4=4 |

## आ - भागः

## वर्णनात्मकाः प्रश्नाः अङ्काः 40

## अपठितावबोधनम्

| | | |
|---|---|---|
| 10. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत -** | 10 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) अन्वेषणम्<br>(ii) चिन्ताक्रमः<br>(iii) कन्याकुमार्याः<br>(iv) उन्नत्यवनत्योः<br>(v) माता | ½ ×4=2 |
| | **(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) भारतस्य सञ्चारं कृत्वा तेन नैके अनुभवाः प्राप्ताः।<br>(ii) न केवलं बाह्यतरङ्गाः अपि च राष्ट्रस्य दुःस्थितिरूपाः आन्तरिकचिन्तातरङ्गाः अपि स्वामिनः चित्तम् अमथ्नन्।<br>(iii) त्रयाणां समुद्राणां सङ्गमे दीर्घकालं तरणं कृत्वा सः एकस्यां शिलायाम् उपाविशत्। | 2×2=4 |

| | | |
|---|---|---|
| | **(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।**<br>**छात्राणां लिखितानि पदानि दृष्ट्वा शुद्धाशुद्धनिर्णयः छात्रहिताय कर्तव्यः।** | 1×1=1 |
| | | |
| | **(ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)**<br>(i) विवेकानन्दाय<br>(ii) तस्मै विवेकानन्दाय<br>(iii) एतावान्<br>(iv) अवनतिः | 1×3=3 |
| | **रचनात्मककार्यम्** | |
| 11. | **भवान् सर्वेशः उदयपुरे वसति। भवान् उदयपुरस्य सौन्दर्यं द्रष्टुं स्वमित्रं चन्द्रेशम् आमन्त्रयति। अत्र मञ्जूषापदानां सहायतया इदं पत्रं सम्पूर्य पुनः लिखतु –**<br>दिनाङ्कः ----------<br>10/15 हिरण्यनगरी<br>(i) **उदयपुरतः**<br><br>प्रिय सुहृद् (ii) **चन्द्रेश!**<br>शुभं भवतु।<br>निवेदनम् इदमस्ति यत् अत्र सर्वं कुशलं वर्तते भवतः कुशलताम् इच्छामि। मित्रवर! इदम् उदयपुरनगरम् अतीव (iii) **सौन्दर्य**-युक्तं वर्तते। इदं नगरं महाराणा-उदयसिंह-राजाधिराजेन (iv) **स्थापितम्** आसीत्। इदं प्रतीयते यत् एतत् नगरं धरायाः (v) **स्वर्गम्** अस्ति। इदं सरोवराणां नगरमपि कथ्यते। यतः अत्र अनेके (vi) **सरोवराः** सन्ति। अनेन अत्र ग्रीष्मस्य अनुभवः अपि न भवति। निकटे एव महाराणा-प्रताप-महाभागानां स्मरणं कारयन्ती (vii) **हल्दीघाटी** अपि वर्तते। अत्र भूमिः रक्तवर्णा अस्ति। समीपे एव स्थितं वैष्णव-सम्प्रदायस्य प्रसिद्धं (viii) **तीर्थम्** नाथद्वारा अपि अस्ति। यत्र जनाः अहर्निशं तीर्थयात्रां कर्तुम् आगच्छन्ति। एकलिङ्ग-महादेवस्य (ix) **देवालयः** आर्य-समाजस्य प्रवर्तकस्य महर्षि-दयानन्दस्य संस्मरणं कारयति। यत्र महर्षिः दयानन्दः सत्यार्थप्रकाश-महाग्रन्थं रचितवान्। मित्र ! मम अतीव अभिलाषा वर्तते यत् भवान् अवश्यमेव अस्य नगरस्य (x) **दर्शनार्थम्** अत्र शीघ्रम् आगच्छेत्। अहं त्वां समस्ते क्षेत्रे नेष्यामि । शीघ्रं स्वागमनस्य सूचनां यच्छतु भवान्।<br>भवदीयं मित्रम् | ½×10=5 |

| | | |
|---|---|---|
| | सर्वेशः | |
| 12. | मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -<br>भारतीयः योगी सर्वत्र (i) **पूज्यते**, विश्वे सर्वदिक्षु स्वस्य योगबलात् अध्यात्मज्ञानं प्रसारितवान् स्वामिविवेकानन्दः। विदेशेषु तेन प्राप्ताः (ii) **अनुभवाः** असङ्ख्काः। स्वामी महानौकया चीनदेशं प्राप्नोत्। तत्र कानिचन नगराणि च अपश्यत् । तत्र (iii) **मन्दिरेषु** चीनेतरजनानां प्रवेशः निषिद्धः इति सः जानाति स्म। तथापि इतरमतेषु विद्यमानाः उत्कृष्टाः अंशाः (iv)**ज्ञातव्याः** इति धिया सः बलात् मन्दिरमेकं प्रविष्टवान्। सपदि द्वित्राः रक्षकाः (v) **स्वामिनम्** उपरुध्य स्थिताः। स्वामिनः (vi) **साहाय्यार्थं** कश्चन द्विभाषाज्ञः अनुवादकः आसीत्। यदा सः अपि (vii) **पलायने** उद्युक्तः तदा स्वामी तं गृहीत्वा 'महोदय ! योगी इति पदं (viii) **चीनभाषया** कथम् अभिधीयते ' इति अपृच्छत् । (ix) **अनुवादकः** तत् पदं त्वरया उच्चार्य अपगतः। क्षणान्तरे स्वामी रक्षकान् उद्दिश्य ' अहं भारतदेशात् आगतः योगी अस्मि' इति उच्चैः अवदत्। आश्चर्यं नाम ! (x) **प्रहरणोद्युक्ताः** चीनरक्षकाः स्वामिनं नमस्कृतवन्तः सत्कृतवन्तः च। | ½×10=5 |
| | **अथवा** | |
| | अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु।<br><br>**वैद्यः** - आगच्छ पुत्र। किं जातम् ? ज्वरः अस्ति किम् ?<br>राजीवः - **न, ज्वरः नास्ति। उदरे पीडा अस्ति।**<br>**वैद्यः** - एवम्। ज्वरः न अस्ति । उदरे पीडा वर्तते। ह्यः किं भक्षितम्?<br>राजीवः - **न किमपि, केवलं आपणे आलुकस्य वटकाः खादिताः।**<br>**वैद्यः** - अहो! आपणे आलुकस्य वटकाः खादिताः। किं न जानासि? अधुना बहिः खाद्यवस्तूनि न खादितव्यानि। एतत् चूर्णं स्वीकरोतु।<br>राजीवः – **कटुः तु नास्ति?**<br>**वैद्यः** - अरे नहि। कटुः नास्ति। पुनरपि औषधेः कृते स्वादः न गणनीयः।<br>राजीवः – **अस्तु। दिने कति वारं ग्रहीतव्यम्?**<br>**वैद्यः** - दिने त्रिवारम् एकचमसमात्रम् उष्णजलेन ग्रहीतव्यम्।<br>राजीवः - **पुनः आगमनस्य आवश्यकता अस्ति किम्? कदा आगन्तव्यम्?** | 1x5=5 |

| | | |
|---|---|---|
| | **वैद्यः** - पुनः आगमनस्य आवश्यकता एव न भविष्यति । स्वास्थ्यं प्रति भविष्ये जागरुकः भव। आरोग्यं परमं सुखम्।<br>**राजीवः** - धन्यवादः। प्रणमामि। | |
| 13. | **अनुच्छेदलेखनम्**<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति । वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति । मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवृत्य अपि वाक्यनिर्माणं कर्तुं शक्यते । | 1×5=5 |
| | **अथवा** | |
| | **निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत -(केवलं वाक्यपञ्चकम्)**<br>1. पुरा भारतं विश्वगुरुः कथ्यते स्म।<br>2. राजस्थानं वीराणां जन्मदायिनी भूमिः अस्ति।<br>3. साहित्ये समाजः प्रतिबिम्बितः भवति।<br>4. अल्पज्ञः जनः एव निरन्तरं वदति।<br>5. गुणवान् जनः एव गुणं जानाति।<br>6. माता/अम्बा बाले स्निह्यति।<br>7. अस्य प्रयासः निश्चयेन प्रशंसनीयः अस्ति। | 1×5=5 |
| | **पठितावबोधनम्** | |
| 14. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –** | 3 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) भोजः<br>(ii) मुञ्जाय<br>(iii) ब्राह्मणः | ½×2=1 |
| | **(आ) पूर्णवाक्येन उत्तरत – ( केवलं प्रश्नैकम् )** | 2×1=2 |
| | (i) राजा मुख्यामात्यानाहूयानुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास यद्यहं राज्यलक्ष्मीभारधारणसमर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा | |

| | | |
|---|---|---|
| | लोकापवादः। अथ वा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा पुत्रहानिर्वंशोच्छेदश्च इति।<br>(ii) सम्प्राप्तराज्यसम्पत्तिर्मुञ्जो मुख्यामात्यं बुद्धिसागरनामानं व्यापारमुद्रया दूरीकृत्य तत्पदेऽन्यं नियोजयामास। | |
| 15. | **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -** | |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) विधात्रा ?<br>(ii) विभूषणम्<br>(iii) सर्वविदाम् | ½×2=1 |
| | **(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नैकम्)**<br>(i) स्वायत्तम् एकान्तगुणं अज्ञतायाः छादनं विधात्रा विनिर्मितम्।<br>(ii) विशेषतः सर्वविदां समाजे मौनमपण्डितानां विभूषणम् । | 1×2=2 |
| 16. | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –** | 3 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) धनुः<br>(ii) उद्योगम्<br>(iii) रोषम् | ½ ×2=1 |
| | **(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नैकम्)**<br>(i) धनुश्लाघा अस्ति चेत् लक्ष्मणः राजा परिपाल्यताम्।<br>(ii) रामः लक्ष्मणं बोधयति यत् भरतः राजा भवेत् वयं वा ननु तत् समम्। यदि ते धनुश्लाघा अस्ति तर्हि सः राजा(भरतः) परिपाल्यताम् इति। | 2×1= 2 |
| 17. | **अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –**<br>**भावार्थः** – श्रीकृष्णः कथयति यत् मूढः अज्ञानविमोहितः जनः (i) **अतिलोलुपः** भवति, किञ्चिद् अल्पमपि प्राप्य (ii) **आत्माभिमानी** भवति यत् अद्य मया इदं प्राप्तम् अतः अहम् अन्यम् अपि स्वमनोरथं शीघ्रमेव (iii) **प्राप्तुं समर्थः** यत् किञ्चिद् मम अस्ति तत् तु मम अस्ति एव परम् अन्यत् सर्वं (iv) **धनमैश्वर्यम्** च मम एव भविष्यति। | ½×4=2 |

| | | |
|---|---|---|
| | **अथवा** | |
| | **प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-**<br>**(क) 'दीर्घप्रयासेन कृतं वस्तु निमेषमात्रेण विनाशं भजेत्।'**<br>(ii) महता प्रयत्नेन साधितं कार्यं क्षणमात्रेण विनश्यति।<br>**(ख) 'सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलानाम्।'**<br>(i) दुष्टानां प्रयासः सुवचनं त्यक्त्वा दोषेषु/व्यसनेषु भवति। | 1×2=2 |
| 18. | **अधोलिखित-अन्वये रिक्तस्थानानि पूरयत -**<br>**अन्वयः** – शैशवे (i) अभ्यस्तविद्यानां (रघुवंशिनां) यौवने (ii) विषयैषिणाम्, वार्द्धके (iii) मुनिवृत्तीनाम् अन्ते योगेन (iv) तनुत्यजाम्, (रघूणाम् अन्वयं वक्ष्ये)। | ½×4=2 |
| | **अथवा**<br>**प्रश्नपत्रात् भिन्नं पाठ्यपुस्तकस्य श्लोकमेकं लिखित्वा तस्य भावार्थं लिखत-**<br>छात्रेण लिखितस्य श्लोकस्य स्वविवेकेन छात्रहिताय निर्णयः कर्तव्यः। | 2x1=2 |
| 19. | **'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -**<br>**'क' स्तम्भः** — **'ख' स्तम्भः**<br>(i) परीक्षार्थमुद्यतोऽस्मि — **(घ) गृहस्थाश्रमप्रयोगशालायाम् ।**<br>(ii) लक्ष्म्याः रक्षार्थम् — **(क) पत्न्याः सहयोगः अनिवार्यः।**<br>(iii) अपि श्रुताः भवद्भिः — **(ख) मम सखीविचारा।**<br>(iv) ज्ञानोदधिस्तु — **(ग) अनन्तपारो गभीरश्च।** | ½×4=2 |

------------------ oooo OOOO oooo ------------------